श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीविष्णुपुराणान्तर्गता

# ॥ श्रीस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीविष्णुपुराणान्तर्गता

# ॥ श्रीस्तुतिः ॥

सिंहासनगतः शक्रः संप्राप्य त्रिदिवं पुनः।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः॥ १ ॥

इन्द्र उवाच
नमस्ये सर्वभूतानां जननीमब्जसंभवाम्।
श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षस्स्थलस्थिताम्॥ २ ॥

पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणाम्।
वन्दे पद्ममुखीं देवीं पद्मनाभप्रियामहम्॥ ३ ॥

त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती॥ ४ ॥

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥ ५ ॥

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च।
सौम्यासौम्यैर्जगद्रूपैः त्वयैतद्देवि पूरितम्॥ ६ ॥

का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः॥ ७ ॥

त्वया देवि परित्यक्तं सकलं भुवनत्रयम्।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम्॥ ८ ॥

दाराः पुत्रास्तथाऽगार सुहृद्धान्यधनादिकम्।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम्॥ ९ ॥

शरीरारोग्यमैश्वर्यं अरिपक्षक्षयस्सुखम्।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम्॥ १० ॥

त्वं माता सर्वलोकानां देवदेवो हरिः पिता।
त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम्॥ ११ ॥

मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम्।
मा शरीरं कळत्रञ्च त्यजेथास्सर्वपावनि॥ १२ ॥

मा पुत्रान् मा सुहृद्वर्गान् मा पशून् मा विभूषणम्।
त्यजेथा मम देवस्य विष्णोर्वक्षस्स्थलालये॥ १३ ॥

सत्त्वेन शौच सत्याभ्यां तथा शीलादिभिर्गुणैः।
त्यज्यन्ते ते नरास्सद्यः सन्त्यक्ता ये त्वयाऽमले॥ १४ ॥

त्वयाऽवलोकितास्सद्यः शीलाद्यैरखिलैर्गुणैः।
धनैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि॥ १५ ॥

स श्लाघ्यस्स गुणी धन्यः स कुलीनस्स बुद्धिमान्।
स शूरस्स च विक्रान्तो यस्त्वया देवि वीक्षितः॥ १६ ॥

सद्यो वैगुण्यमायान्ति शीलाद्यास्सकला गुणाः।
पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे॥ १७ ॥

न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः।
प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन॥ १८ ॥

श्रीपराशर उवाच
एवं श्रीस्संस्तुता सम्यक् प्राहहृष्टा शतक्रतुम्।
शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज॥ १९ ॥

श्रीरुवाच
परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे।
वरं वृणीष्व यस्त्विष्टो वरदाहं तवागता॥ २० ॥

इन्द्र उवाच
वरदा यदि मे देवि वरार्हो यदि चाप्यहम्।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः॥ २१ ॥

स्तोत्रेण यस्तवैतेन त्वां स्तोष्यत्यब्धिसम्भवे।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम॥ २२ ॥

श्रीरुवाच
त्रैलोक्यं त्रिदशश्रेष्ठ न सन्त्यक्ष्यामि वासव।
दत्तो वरो मयायं ते स्तोत्राराधनतुष्टया॥ २२ ॥

यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी॥ २३ ॥

श्रीपराशर उवाच
एवं वरं ददौ देवी देवराजाय वै पुरा।
मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता॥ २४ ॥

भृगोः ख्यात्यां समुत्पना श्रीः पूर्वमुदधेः पुनः।
देवदानवयत्नेन प्रसूताऽमृतमन्थने॥ २५ ॥

एवं यदा जगत्स्वामी देवदेवो जनार्दनः।
अवतारं करोत्येषा तदा श्रीस्तत्सहायिनी॥ २६ ॥

पुनश्च पद्मादुत्पन्ना आदित्योभूद्यदा हरिः।
यदा च भार्गवो रामस्तदाभूद्धरणी त्वियम्॥ २७ ॥

राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि।
अन्येषु चावतारेषु विष्णोरेषानपायिनी॥ २८ ॥

देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी।
विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम्॥ २९ ॥

यश्चैतच्छृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः।
श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयम्॥ ३० ॥

पठ्यते येषु चैवेयं गृहेषु श्रीस्तुतिर्मुने।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन॥ ३१ ॥

एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती॥ ३२ ॥

इति सकलविभूत्यवाप्तिहेतुः
    स्तुतिरियं इन्द्रमुखोद्गता हि लक्ष्म्याः।
अनुदिनमिह पठ्यते नृभिर्यैः
    वसति न तेषु कदाचिदप्यलक्ष्मीः॥ ३३ ॥

॥ इति विष्णुपुराणान्तर्गता श्रीस्तुतिः सम्पूर्णा ॥